रागपुष्पः, पुं, (रागविशिष्टं रक्तवर्णं पुष्पं यस्य।) बन्धूकः। रक्ताम्लानः। इति राजनिर्घण्टः॥

रागपुष्पी, स्त्री, (रागयुक्तं पुष्पं यस्याः। ङीप्।) जवा। इति राजनिर्घण्टः॥ (गुणादयोऽस्य जवाशब्दे ज्ञातव्याः॥)

रागप्रसवः, पुं, (रागयुक्तो रक्तवर्णः प्रसवः पुष्पं यस्य।) बन्धूकः। रक्ताम्लानः। इति राजनिर्घण्टः॥

रागयुक्, [ज्] पुं, (रागेण युज्यते इति। युज्+क्विप्।) माणिक्यम्। इति राजनिर्घण्टः। कस्मिंश्चित् पुस्तके रागदृक् इति पाठोऽपि विद्यते॥

रागरज्जुः, पुं, (रागो रज्जुरिव यस्य। नायकयोः परस्परानुरागबद्धत्वात्तथात्वम्।) कामदेवः। इति शब्दरत्नावली॥

रागलता, स्त्री, (रागस्य जनिका लतेव।) कामदेवपत्नी। इति जटाधरः॥

रागवृन्तः, पुं, (रागस्य वृन्त इव।) कामदेवः। इति शब्दमाला॥

रागषाड़वः, पुं, दाड़िमद्राक्षायुक्तमुद्गयूषः। अस्य गुणाः। रुचिकारित्वम्। लघुपाकित्वम्। वातपित्तकफाविरोधित्वञ्च। इति राजवल्लभः॥ (यथा, सुश्रुते। १। ४६ अध्याये कृतान्नवर्गे।
"ज्ञेयः पथ्यतमश्चापि मुद्गयूषः कृताकृतः।
स तु दाड़िममृद्वीकायुक्तः स्याद्रागषाड़वः।
रुचिष्यो लघुपाकश्च दोषाणामविरोधकृत्॥"
तथास्य गुणाः।
"लघवो वृंहणा वृष्याः हृद्या रोचनदीपनाः।
तृष्णामूर्च्छाभ्रमच्छर्द्दिश्रमघ्ना रागषाड़वाः॥"
इति च सुश्रुते सूत्रस्थाने ४६ अध्यायः॥)

रागसूत्रं, क्ली, (रागयुक्तं रक्तवर्णं सूत्रम्।) तुलासूत्रम्। पट्टसूत्रम्। इति मेदिनी। रे, २६४॥

रागाङ्गी, स्त्री, (रागविशिष्टमङ्गं यस्याः। ङीप्।) मञ्जिष्ठा। इति राजनिर्घण्टः॥

रागाढ्या, स्त्री, (रागेण आढ्या।) मञ्जिष्ठा। इति राजनिर्घण्टः॥

रागारुः, त्रि, आशां दत्त्वा दानविमुखः। यथा,
"आशां बलवतीं दत्त्वा यो हन्ति पिशुनो जनः।
स जीवाशोऽपि रागारुर्द्देवो दात्रस्तु दातरि॥"
इति शब्दमाला॥

रागाशनिः, पुं, (रागेषु विषयवासनासु अशनिरिव।) बुद्धः। इति त्रिकाण्डशेषः॥

रागिणी, स्त्री, (रागोऽस्त्यस्या इति। राग+इनिः। ङीप्।) विदग्धा नारी। इति जटाधरः॥ मेनकाया ज्येष्ठकन्या। यथा,—
"रागिणी नाम संजाता ज्येष्ठा मेनासुता मुने।
शुभाङ्गी पद्मपत्राक्षी नीलकुञ्चितमूर्द्धजा॥"
इति वामनपुराणे ४८ अध्यायः॥
जयश्रीनाम्नी लक्ष्मीः। इति पुराणम्॥ षड्रागाणां पत्नी। इति हलायुधः॥ सा तु हनूमन्मते भरतमते च त्रिंशत्प्रकारा। सोमेश्वरमते कल्लिनाथमते च षट्त्रिंशत्प्रकारा॥ आसां विवरणं रागशब्दे द्रष्टव्यम्॥

रागी, [न्] त्रि, (रन्ज+"संपृचानुरुधेति।" ३। २। १४२। इति तच्छीलादिषु घिनुन्। यद्वा, रागोऽस्यास्तीति। राग+इनिः।) अनुरक्तः। (यथा, मार्कण्डेये। २१। ३१।
"त्वय्यस्या हृदयं रागि भर्त्ता चान्यो भविष्यति।
यावज्जीवमतो दुःखं सुरभ्या नान्यथा वचः॥")
कामुकः। इति विश्वः॥ रङ्क्ता। इति मेदिनी॥ (विषयानुरागयुक्तः। स च द्विविधः। यथा, देवीभागवते। १। १७। ३७—३८। ५१।
"द्विविधं सर्व्वलोकेषु सर्व्वत्र द्विविधो जनः।
रागी चैव विरागी च तयोश्चित्तं द्विधा पुनः॥
विरागी त्रिविधः कामं ज्ञातोऽज्ञातश्च मध्यमः।
रागी च द्विविधः प्रोक्तो मूर्खश्च चतुरस्तथा॥"
"रागो यस्यास्ति संसारे स रागीत्युच्यते ध्रुवम्।
दुःखं बहुविधं तस्य सुखञ्च विविधं पुनः॥"
रक्तवर्णविशिष्टः। यथा, कथासरित्सागरे। २१। ९।
"ईर्ष्यारुषामभावेऽपि भङ्गुरभ्रुणि रागिणि।
न मुखे तत्पयो राज्ञ्योस्तद्वृद्धिस्त्रिमाययौ॥")
पुं, तृणधान्यविशेषः। तत्पर्य्यायः। लाञ्छनः २ बहुतरकणिशः ३ गुच्छकणिशः ४। अस्य गुणाः। तिक्तत्वम्। मधुरत्वम्। कषायत्वम्। शीतत्वम्। पित्तास्रनाशित्वम्। बल्यत्वञ्च। इति राजनिर्घण्टः॥

राघ, ऋ ङ शक्तौ। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्।) ऋ, अरराघत्। ङ, राघते। शक्तिः सामर्थ्यम्। इति दुर्गादासः॥

राघवः, पुं, (रघोरपत्यमिति। रघु+अण्।) रामचन्द्रः। (यथा, रघुः। १२। ३२।
"रावणावरजा तत्र राघवं मदनातुरा।
अभिपेदे निदाघार्त्ता व्यालीव मलयद्रुमम्॥"
अजः। यथा, रघुः। ८। १६।
"यतिपार्थिवलिङ्गधारिणौ
ददृशाते रघुराघवौ जनैः॥"
दशरथः। यथा, रामायणे। २। ६४। १।
"वधमप्रतिरूपं तु महर्षेस्तस्य राघवः।
विलपन्नेव धर्म्मात्मा कौशल्यामिदमब्रवीत्॥"
रघुवंशीयमात्रम्। यथा, तत्रैव। २।६४।२५।
"अपि त्वद्य कुलं न स्याद्राघवाणां कुतो
भवान्॥")
समुद्र-महामत्स्यविशेषः। इति मेदिनी॥ वे, ४८॥ (यथा, लघुवृत्तौ प्रथमपादे दुर्गसिंहः।
"अस्ति मत्स्यस्तिमिर्नाम शतयोजनविस्तृतः।
तिमिङ्गिलगिलोऽप्यस्ति तद्गिलोऽप्यस्ति
राघवः॥")

राघवायनं, क्ली, (राघवस्य रामस्य चरितान्वितं अयनं शास्त्रम्।) रामायणम्। यथा,—
"सेतिहासपुराणानि राघवायनभारतम्।
समाप्तिरहितान्येव सन्ति तानि श्रुतानि ते॥"
इत्यग्निपुराणे वामनप्रादुर्भावनामाध्यायः॥

राङ्कलः, पुं, इषत्कण्टकः। इति हारावली।६१॥

राङ्कवं, क्ली, (रङ्कौ भवम्। रङ्कु+"रङ्कोरमनुष्येऽण् च।" ४। २। १००। इति अण्।) मृगलोमजातवस्त्रादि। तत्पर्य्यायः। मृगरोमजम् २। इत्यमरः। २। ६। १११॥ रङ्कुर्मृगभेदः ततो जातार्थे ष्णः पशवोऽपि मृगा इति रूढ्या मेषादिलोमजमपि कम्बलादि राङ्कवम्। इति तट्टीकायां भरतः॥ (यथा, महाभारते। २। ५०। २३।
"और्णंच राङ्कवञ्चैव पट्टजं कीटजन्तथा॥"
पुं, गौः। इति काशिका॥ राङ्कवास्तृतौ, त्रि। यथा, महाभारते। ९। ४९। २६।
"क्रौञ्चपारावतनिभैर्व्वदनै राङ्कवैरपि॥")

राङ्गणं, क्ली, पुष्पविशेषः। रङ्गन् इति भाषा। अस्य गुणः। रक्तपित्तनाशित्वम्। इति द्रव्यगुणः॥

राज, ऋ ञ श दीप्तौ। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-अक०-सेट्।) ऋ, अरराजत्। ञ, राजति राजते। श, रेजतुः। इति दुर्गादासः॥

राजकं, क्ली, (राज्ञां समूहः। राजन्+"गोत्रोक्षोष्ट्रोरभ्रराजेति।" ४।२।३९। इति वुञ्।) नृपसमूहः। इत्यमरः। २। ८। ३॥ यथा, मार्कण्डेये। १०९। ६।
"हृष्टपुष्टमतीवासीत् तस्मिन् राजन्यशेषतः।
राजकं सकलं चोर्व्व्यां पौरजानपदो जनः॥"
राजन्+स्वार्थे कन्।) राजनि, पुं। (यथा, हरिवंशे भविष्यपर्व्वणि। २४। ९।
"तवाङ्गं तिलशः कृत्वा श्वभ्यो दास्यामि राजक॥"
राज्+ण्वुल्।) दीप्तिकारके, त्रि॥

राजकदम्बः, पुं, (कदम्बानां राजा। राजदन्तादित्वात् परनिपातः।) कदम्बविशेषः। यथा,—
"कादम्बर्य्यः प्रावृषेण्यो नीपो धूलीकदम्बकः।
कदम्बप्रियकौ राजकदम्बोऽरुष्करोऽम्रिकः॥"
इति जटाधरः॥

राजकन्या, स्त्री, (राज्ञः कन्येव।) केविकापुष्पम्। इति राजनिर्घण्टः॥ नृपसुता च॥ (यथा, भागवते। ९। ६। ४२।
"हृतः स राजकन्याभिरेकः पञ्चाशता वरः॥")

राजकर्कटी, स्त्री, चीनाकर्कटी। इति राजनिर्घण्टः॥

राजकशेरुः, पुं, (कशेरूणां राजा। राजदन्तादित्वात् परनिपातः।) भद्रमुस्ता। इति राजनिर्घण्टः॥

राजकीयः, त्रि, (राज्ञ इदम्। राजन्+"राज्ञः क च।" ४। २। १४०। इति छः ककारश्चान्तादेशः।) राजसम्बन्धी। राजकस्यायं इत्यर्थे कीयप्रत्ययेन सिद्धः॥ (यथा, कथासरित्सागरे। ६२। २२८।
"ततस्तदर्थं राज्ञौ स राजकीयं सरो ययौ॥")

राजकुमारः, पुं, (राज्ञः कुमारः।) राजपुत्रः। तत्र वर्णनीयानि यथा,—
"कुमारे शस्त्रशास्त्रश्रीकलाविनयगुणोत्कृषाः।